तिरुमलतिरुपतिदेवस्थानानि

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका
जनवरि - २०२५ रू.२०/-

SAPTHAGIRI (SANSKRIT)
SPIRITUAL ILLUSTRATED MONTHLY
Volume:11, Issue: 10
January 2025, Price Rs.20/-
No. of pages-24



वैकुण्ठैकादशी
10.01.2025

श्रीवेङ्कटाचलपतिंश्रितपारिजातं
वागीशमुख्यसुरवन्दितपादपद्मं।
पद्मावतीहृदयपङ्कजलोलभृङ्गं
प्रस्तौमि सन्ततमहं परिपूर्णभक्त्या।।

तिरुचानूरु श्रीपद्मावतीमातुः नवम्बर् 28 तिथ्यारभ्य डिसेम्बर् पर्यन्तं अङ्गरङ्ग वैभवतया वार्षिक कार्तिक ब्रह्मोत्सवः प्रचलितः। अस्मिन् सन्दर्भे मातुः पीताम्बराणि राष्ट्रदेवादायशाखामात्यवर्याः गौरवनीयाः श्री आनं रामनारायणरेड्डि महोदयाः समर्पयामासुः। तत्र पालकमण्डल्यध्यक्षाः, ति.ति.दे. कार्यनिर्वहणाधिकारिणः श्री जे.श्यामलाराव ऐ.ए.यस्., अनुबन्धकार्यनिर्वहणाधिकारी श्री सि.हेच्. वेङ्कय्यचौदरि, ए.आर्.यस्., ति.ति.दे. संयुक्तकार्यनिर्वहणाधिकारी श्री वीरब्रह्मम्, ऐ.ए.यस्., अपि च श्रीमती एम्. गौतमी महाभागिनी ऐ.ए.यस्., इत्येते भागं गृहीतवन्तः। एतेषां सर्वेषां मनोहर दृश्यमालिका।














# गीतामृतम्

श्रीभगवानुवाच -

कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम्।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति।।

भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम्।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते।।

(भगवद्गीता २.४३-४४)

हे अर्जुन! नित्यं कामासक्ताः जनाः स्वर्गादन्यत् किमपि नास्तीति तदेव परमप्राप्यमिति भावयन्ति। ते क्षणिकप्रापञ्चिकस्रक्चन्दनादिभोगश्वर्यासक्ताः विविधसकामकर्माणि पुनर्जन्मफलप्रदानि प्रोत्साहयन्तः प्रीतिजनकवचांसि वदन्ति। तेषु प्रीतिवाक्येषु पतिताः अज्ञानिनां बुद्धयः भगवल्लक्ष्यसमाधौ न स्थिराः स्युः।.

# सङ्कीर्तनम्

एवं श्रुतिमतमिदमेव त
द्भावमेतुमतः परं नास्ति
अतुलजन्मभोगासक्तानां
हतवैभवसुखमिदमेव
सततं श्रीहरिसङ्कीर्तनं त
द्व्यातिरिक्तसुखं वक्तुं नास्ति
बहुल मरण परिभवचित्तानां
इहपरसाधनमिदमेव
अहिशयन मनोहरसेवा त
द्विहरणं विना विधिरपि नास्ति।

(अन्नमाचार्य आध्यात्मक सङ्कीर्तना)



# तिरुमलक्षेत्रे धनुर्मासोत्सवाः

यथा सर्वे अगस्त्यमहर्षितुल्याः न भवन्ति तथैव ब्रह्माण्डसमस्तक्षेत्राणि वेङ्कटाचलक्षेत्र तुल्यानि न भवन्ति। वेङ्कटाचलक्षेत्रे सर्वं विचित्रं, अद्भुतमिव भाति। स्वामिनः प्रवर्तमानोत्सवानां, निवेदनानां, पुण्यतीर्थमहात्म्यानां, परिशीलनात् वैशिष्ट्यं सर्वत्र दृश्यते। वर्षे वर्षे डिसेम्बर् १५ तिध्यारम्भात् जनवरि १४ तिथि पर्यन्तं एकमासावधौ तिरुमलक्षेत्रे निर्वाह्यमान धनुर्मासोत्सवपरिशीलनेन क्षेत्रप्राधान्यं सम्यगभिव्यज्यते।

मार्गशिरपुष्यमासयोः आगच्छद्धनुर्मासे मासपर्यन्तं श्रीनिवासं श्रीकृष्णमिव, वक्षस्थलव्यूहलक्ष्मीं गोदादेवीति भावयन्तः रत्नविशिष्टस्वर्णशुकं स्वामिनः वक्षःस्थले अलङ्कुर्वन्ति। रात्रौ डोलासेवायां भोगश्रीनिवासमूर्तेः स्थाने नवनीतगोपालकृष्णसेवा प्रवर्तते। सुप्रभातसेवायां सुप्रभातस्तोत्रावलिस्थाने गोदादेवीतिरुप्पावै पाशुराणि पठन्ति। पश्चात् स्वामिनं सहस्रनामभिः तुलसीस्थाने बिल्वदलैरर्चयन्ति।

धनुर्मासे पौर्णम्याः पूर्वं आगतवैकुण्ठैकादश्यां प्रातःकालदारभ्य दशदिनपर्यन्तं स्वामिनः वैकुण्ठद्वारदर्शनभाग्यं प्राप्तुं शक्यते तस्मिन् देवे उदयकाले स्वर्णरथोत्सवः दर्शनीयः एव। तद्वैभवं वर्णयितुमशक्यम्। पश्चाद्दिने द्वादशीदिनं श्रीस्वामिपुष्करिणीतीर्थमुक्कोटि। तस्मिन् दिने सूर्योदयात्पूर्वमेव पुष्करिण्यां श्रीपतेः चक्रस्नानं निर्वाह्यते। अस्मिन् समये ब्रह्माण्डस्थ समस्ततीर्थाणि श्रीस्वामिपुष्करिण्यां मिश्रितानि भक्तेभ्यः संक्रमितसमस्तपापेभ्यः विमुक्तिं प्राप्नुवन्ति एतस्मात् कारणात् अस्य क्षेत्रस्य प्राशस्त्यं व्यज्यते। एतादृशपवित्र स्वामिपुष्करिणी स्नानं सर्वपापहरं सर्व सिद्धिप्रदम्। वैकुण्ठैकादश्याः दिने तिरुमलक्षेत्रे प्रवर्तमानरसवत्तरमनोहरदृश्यं प्रणयकलहोत्सवः। मृगयार्थं विनोदार्थं वा गत्वा प्रतिनिवृत्तस्वामिनः कुत्रगतोऽसि काभिः मिलित्वा आगतोऽसि इति श्रीदेवीभूदेव्यौ प्रणयकलहेन अवरोधं कल्पयन्त्यौ आस्ताम्। अयमुत्सवः अत्यन्तं रसरम्यः भवति। अन्यः विशेषः किमितिचेत् वैकुण्ठैकादश्याः दश दिनपूर्वमेव प्रारब्धं पश्चात् ५ दिन पर्यन्तं दिने दिने सायंसमये श्रीपतिसन्निधौ श्रीजिय्यर्महोदयानां पाशुर पारायणं कर्णपेयः अद्भुतयज्ञः। धनुर्मासान्ते आगछन्मुख्यपर्वं संक्रान्तिः। अस्यपर्वदिनस्य पूर्वदिने भोगिदिने श्रीपतेः भोगिरथं संक्रान्तेरनन्तरं कनुमपर्वदिने उदये श्रीपतिसन्निधौ गोदाकल्याणं वैभवोपेततया निर्वाह्यते।

कनुमदिनसायंसमये एकस्याः आन्दोलिकायाः पाश्वे कृष्णस्वामी अन्यस्यां आन्दोलिकायां आयुधधारी श्रीवेङ्कटेश्वरः पर्वतसानुसु भक्तसम्मर्दनेन पारुमृगयार्थं प्रस्थितः विजययात्रानन्तरं पुनः आलयप्रवेश पारुवेटमहोत्सवः भक्तानानन्दामृतसमुद्रे, नयन् असमानसप्तगिरीशोत्सवः अतिमनोहरः। एतादृशानि मनोहर दृश्यान्यनन्तानि धनुर्मासे प्रवर्तन्ते। एवं वेङ्कटाचलः बहुधा प्रशस्तियुतः राराजते।

**कृष्णं वन्दे जगद्गुरुम्**

# जनवरि -२०२५

सम्पुटिः-११ सञ्चिका-१०

स्वस्तिश्री चान्द्रमानश्रीक्रोधिनामसंवत्सर पुष्पशुद्धविदिय बुधवारादारभ्य- माघशुद्धविदिय शुक्रवारपर्यन्तम् - २०२४


| | |
|---|---|
| मकरसंक्रान्तिः<br>- डा पि.माधवी | 06 |
| त्यागराज स्वामिवैभवाराधनोत्सवः<br>- आचार्य जि.पद्मनाभम् | 08 |
| विधिरनुल्लङ्घनीयः | 10 |
| पुरन्दरदासाराधनमोहत्सवः<br>- डा एम्.ईश्वरम्मा | 15 |
| कूरत्ताळवार् वैभवम्<br>- डा के.कोटेश्वरय्या | 17 |
| संक्रान्ति सानन्दोत्सवाः (चित्रकथा)<br>- डा.के.सूर्यनारायणरेड्डि | 20 |
| बालविनोदिनी | 22 |


मुखचित्रम् - श्रीवेङ्कटेश्वरस्वामिनः, तिरुमल।
अन्तिमपुटः- श्रीपद्मावतीदेव्याः, तिरुचानूरु।


## सङ्केतः

प्रधानसम्पादकः,
सप्तगिरिः, ति.ति.देवस्थानानि
तिरुपतिः - ५१७ ५०७.
दूरभाषा - ०८७७ - २२६४५४३, २२६४३५९
सम्पादकः,
०८७७ - २२६४३६०
सूचनानाम्, आक्षेपाणां च कृते
सम्पर्कं कुर्वन्तु -
sapthagiri.helpdesk@tirumala.org


एका पत्रिका : रू.२०/-
वार्षिकग्राहकत्वम् रू.२४०/-
आजीविक ग्राहकत्वम् रू.२४००/-

*वेङ्कटाद्रिसमं स्थानं*
*ब्रह्माण्डे नास्ति किञ्चन ।*
*वेङ्कटेशसमो देवो*
*न भूतो न भविष्यति ॥*


तिरुमलतिरुपतिदेवस्थानम्

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका





गौरवसम्पादकः-
श्री जे.श्यामला राव, I.A.S.,
कार्यनिर्वहणाधिकारी
ति.ति.देवस्थानानि

प्रकाशकः - प्रधानसम्पादकः
डा॥के.राधारमणः,
M.A., M.Phil., Ph.D.,P.G.Dip.in Epigraphy, Dip. in Yoga

सम्पादकः -
डा॥ वि.जि.चोक्कलिङ्गम्, M.A., Ph.D.,

मुद्रापकः - श्री पि.रामराजु, M.A.,
प्रत्येकाधिकारी,
ति.ति.दे.मुद्रणालयः,
तिरुपतिः।

मुख्यछायाचित्रग्रहणम् - श्री पि.एन्.शेखरः,
छायाचित्रग्राहकः, ति.ति.दे.
श्री बि.वेङ्कटरमणः,
सहायक-छायाचित्रग्राहकः, ति.ति.दे.






सूचना
मुद्रितलेखानां विचाराः लेखकानामेव। एतद्विषये अस्माकं दायित्वं नास्ति।
– प्रधानसम्पादकः





# मकरसंक्रान्तिः

- डा.पि.माधवी, चरवाणी - ८५१९८०४७८४





सूर्यः दक्षिणायनं परित्यज्य मकरसंक्रान्तिदिनात् उत्तराभिमुखो भवति, अर्थात् कटकराशेः मकरराशौ प्रविशति। उत्तरायणं देवकर्मणां योग्यः पुण्यकालः। ''मेषादिषु क्रमेण सञ्चरतस्सूर्यस्य पूर्वस्मादुत्तर-राशौ संक्रमणप्रवेशस्संक्रान्तिः।

अस्मिन्नयने मृतः पुण्यात्मा सन् देवमहत्त्वं प्राप्य सूर्यसायुज्यं प्राप्नोतीति वेदवचनम्। संवत्सरे द्वादश संक्रान्तिषु मकरसंक्रान्तिः आन्ध्राणां सर्वेषां सुपरिचितपर्वदिनम्। सूर्यसञ्चारात् आगते अस्मिन् पर्वदिने स्त्रियः प्रातःकाले गृहप्राङ्गणे मनोहररङ्गवल्लीः निर्मान्ति। अस्मिन् दिने श्रीरामं सम्पूज्य उपवसितव्यमिति चतुर्वर्गचिन्तामणौ प्रोक्तम्। संक्रान्तौ नायीब्राह्मणाः गृहं गृहमागत्य मङ्गलवाद्यघोषान् श्रावयित्वा गृहस्थेभ्यः शालिधान्यादीन् स्वीकुर्वन्ति। शरतल्पगतः भीष्मः उत्तरायणपुण्यकालागमन पर्यन्तं निरीक्ष्य ततः एव पुण्यकाले असून् त्यक्त्वा भगवल्लीनः सञ्जातः। विवाहोपनयनादि पुण्यकार्याणि उत्तरायणे एव निर्वहन्ति। दक्षिणायने मृताः उत्तरायणगमन पर्यन्तं स्वर्गद्वारे एव निरीक्षन्ते। केवलं पुण्यवतामेव उत्तरायणकालमरणपुण्यप्राप्तिः सम्भवति। मकरसंक्रान्तिपर्वमतीव पुरातनम्। संक्रान्ति सम्बन्धिनी मनोहरपौराणिकी कथा एवं दृश्यते। गुणवती पतिव्रता कृपी नाम्नी द्रोणाचार्य पत्नी भर्त्रा सह एकस्मिन्नाश्रमे वसति स्म। सः कार्यार्थं बहिर्गते द्रोणाचार्ये दुर्वासमुनिः भिक्षार्थमटन् मार्गमध्ये कृपीगृहं प्राविशत्। कृपी अतिथिं तं पूजयित्वा ''वयमकिञ्चनाः वृद्धधेनुंविना अन्या सम्पत्तिमपि नास्तीति दारिद्र्यं दूरीकर्तुमुपायं वक्तुमयाचत। दयाळुः महर्षिः संक्रान्तिव्रताचरणाय आदित्य व्रतविधानमेवमुवाच - गङ्गास्नानं दधिदानं इष्टार्थ-सिद्ध्यर्थमवश्यं कर्तव्यमिति ब्राह्मणाय यशोदा दधिदानात् पुत्रं श्रीकृष्णं प्राप्य नन्दंकुलाधिपतिश्चकारेति, त्वमपि तिलपिण्डं शरीरोपरि लेपयित्वा नदीस्नानं कृत्वा आगच्छेत्यादिशत्। ततः त्वददृष्टवशादहमत्रागतोऽस्मीति दधिदानं मह्यमाचर इत्युक्त्वा तत्फलतया सत्पुत्रः जनिष्यतीति, जातः पुत्रः पितॄणां ऋणत्रयमपाकरिष्यतीति समुचितमुपायमुपदिदेश। कृत्या, प्रोक्तप्रकाराचरणात् महातेजस्वी बलवान् बुद्धिमान् अश्वत्थामा सञ्जातः। ततः प्रभृति कृप्याःकुटुम्बदारिद्र्यबाधा नष्टा। मुंबई प्रान्ते संक्रान्तिदिने ब्राह्मणमाहूय समुद्रस्नानं शास्त्रोक्तरीत्या आचरन्ति। ब्राह्मणेभ्यः बहुमानं ददति। गृहस्थाः तिलपूर्णताम्रपात्रादीनि यथा शक्ति वितरन्ति। स्त्रियः बन्धूनाहूय अन्नसन्तर्पणं कुर्वन्ति। सर्वे संक्रान्तिदिने नूतनवस्त्राणि धरन्ति। गुडमिश्रित तिलपिण्डं गृहं गृहं गत्वा ददति। जामातारमूहूय नूतनवस्त्रादिभिः सन्तोषयन्ति। संक्रान्तौ, तिलधान्यप्रामुख्यात् पर्वदिनं तिलसंक्रान्तिरित्यपि वदन्ति। संक्रान्तौ स्नानमवश्यमाचरणीयम्। अस्नानात् सप्तजन्मपर्यन्तं रोगी दरिद्रश्च स्यादिति शास्त्र-वचनम्। दक्षिणायने कृतं पापं उत्तरायणे विनश्यति। अतः सूर्यमाराध्य तिलकूष्माण्डकम्बलधान्यवस्त्रतैलदीपदानादीनि अवश्यं कर्तव्यानीति शास्त्रोक्तिः। संकान्त्यनुबन्धतया पूर्वं पशुपर्वदिनमपि कृषीवलाः अनडुत्सवं

अधर्ववेदोक्तमित्याचरन्ति। अस्मिन् दिने वृषाभान् घेनूः स्नापयित्वा अलङ्कृत्य मधुरपदार्थैः भोजयन्ति पशुशालाः परिशुभ्रं कुर्वन्ति। ब्रह्मा गोरूपं धृत्वा अमृततुल्यं पयः सर्वमानवप्रयोजकतया ददातीति अतः गोपूजा मातृपितृब्रह्मपूजातुल्येति सर्वैः गावः पूजनीयाः इति वदन्ति। एकैकस्मिन् सूर्यसंक्रमणवेळा संक्रमणमिति, क्रान्तिर्नाम गमनमिति एवं सूर्यगमनं षण्मासाः दक्षिणायनमिति षण्मासाः उत्तरायणमिति संवत्सरं द्विधाविभज्य व्यवहरामः। सूर्यात् सस्यसंपत् कृषीवलहस्तागतकालः उत्तरायणं शुभसङ्केत सूचकः। आध्यात्मिकसामाजिककौटुम्बिकतया चैतन्यं जागृतं कृत्वा जीविततेजोपरकशक्तिं अस्मिन् संक्रान्ति पर्वणि स्पष्टतया पश्यामः। इहपर धर्मसेतुनिर्माण भारतीयसंप्रदाये मकरसंक्रमणकालः अद्भुतपरिणामघट्टः।

कनुम अथवा पशु पर्वदिने पशुपूजया साकं पक्षिपूजामपि कुर्वन्ति। पक्षिनिमित्तं पक्षिचित्राणि विलिख्य नवग्रहसङ्केतं रङ्गवल्लीषु प्रदर्शयन्ति। गृहमुख भागोपरि आहारार्थं धान्यानि पक्षिभिः अत्तुमनुकूलतया पुञ्जीकृत्य सूत्रैः बध्नन्ति। संक्रान्ति दिनेषु जानपदकलाः सानन्दं प्रदर्शयन्ति।

केचित् हरिदासाः गङ्गिरेद्दुनामक वृषभं गृहं गृहं परिभ्रामयन्तः पादनमस्कारं कारयन्तः बालकानामानन्दं जनयन्तः गृहस्थैः दत्तानि धान्यानि स्वीकुर्वन्ति। संक्रान्तौ गृहप्राङ्गणे रङ्गवल्लीषु नवबिन्दवः नवग्रहसूचकाः। रङ्गवल्लीं परितः प्रदक्षिणं नवग्रहप्रदक्षिणमेवेति मन्तव्यम्। सूर्यसंक्रमण वेळायां बालेभ्यः, सूर्यस्य आशीर्वादाय विद्यायुरारोग्यैश्वर्य सिद्ध्यर्थं बदरीफलानि बालकशिरस्सु प्रकिरन्ति। सर्वे कुटुम्बस्थाः तदा सूर्यं प्रार्थयन्ते। सूर्यः उत्तरायणे प्रविशतीति प्रातःकाले शुष्ककाष्ठाः ज्वालयित्वा महाग्निराशिं कल्पयित्वा आन्ध्राः चलिमण्टलु नामक शीतोपशमन कार्यं निर्वहन्ति। आन्ध्रभाषायां एतत्कार्यमेव भोगिमण्टलु इति व्यवहरन्ति। संक्रान्तौ गङ्गिरेदु सम्बन्धि अटन विषयः - गङ्गा+इर+एद्दु। इरा वाहनम्। गङ्गादेवी शङ्करशिरसि वर्तते। अतः अयं वृषभः साक्षात् शङ्करः एव। वृषभः परमेश्वरवाहनम्। वृषभमूपुरं शिवलिङ्गाकारः अतः वृषभः एव शिवः इति भावनीयम्। गङिगरेद्दुपुरतः पश्चाद्भागे अनुसृत्य आगताः मनुष्याः प्रमथगणाः इति भावनीयम्। एवमत्र भक्ति आध्यात्मिक भावना गंगिरेद्दुक्रीडायां संदृश्यते। संक्रान्तौ गोब्बेम्मासु आध्यात्मिक विशेषः - गोमयं पिडीकृत्य सेवन्तिका पुष्पाणां हरिद्राकुङ्कुमौ लेपयित्वा गोब्बेम्माः निर्मीय परितः भ्रमन्तः गायन्ति। नैवेद्यमपि समर्पयन्ति।

गोदादेवी पूर्वफल्गुणी नक्षत्रे कर्काटक लग्ने जाता। सा गोपिकाभिः सह कृष्णं भक्तया सेवते। दृश्यमान गोब्बेम्माः गोमयञ्च गोपिकाः एव। ताः गोपिकाः एव गोपि - बोम्मुलु, क्रमशः गोब्बम्मलु इति व्यवह्रियन्ते। संस्कृत गोपी शब्द तद्भव रूपं गोब्बि इति। गोब्बि+अम्म गोब्बेम्मा। गोपिकाभिः आराध्यमाना गोदादेवी इत्यर्थः। गोब्बेम्माः कृष्ण भक्ता एव। एवं गोपिकाभिः भगवदाराधनपरायणता अत्र अस्तीति आध्यात्मिकविशेषः अवगन्तव्यःसंक्रान्तौ वृषभेण सह आगच्छन्तः हरिदासाः श्राव्यकण्ठध्वनिना गोविन्दनाम सङ्कीर्तनं कुर्तन्तः एवं गृहस्थान् एवं सूचयन्ति -

अदत्वा मादृशो माभूः दत्वा त्वं त्वादृशो भव। इति। संक्रान्तौ अपि 'बुडबुक्कुल' वाद्यं कुर्वन्तः ज्योतिष्करूपेण आगताः ''अम्बपलुकु जगदम्बपलुकु कञ्चिकामाक्षिपलुकु इति गायन्तः भिक्षां स्वीकुर्वन्ति। एवं बहु कलाभिः भक्तया ध्यात्मिकभावनया महावैभवोपेततया संक्रान्ति पर्वदिनं निर्वहन्ति।

**जपाकुसुमसङ्काशं काश्यपेयं महाद्युतिं।**
**तमोरिं सर्वपापघ्नं प्रणतोस्मि दिवाकरम्।।**



# त्यागराज स्वामिवैभवाराधनोत्सवः

- आचार्य जि.पद्मनाभम्

चरवाणी -९२४७३२८२८६

नारद प्रह्लादादिपौराणिक महाभक्ताः इव, पोतन, भद्राचलरामदासादिचारित्रक भक्त वरेण्याः इव सप्तर्षिमण्डलमिव भव्यजीवितविधानैः उदाराशयैः आत्महृदवलोकन दृष्ट्या स्वीयजीवितपरमार्थतत्त्वाय साहित्यसङ्गीत पुटुत्वमहत्त्वं कृत्वा महामहित्मोपोतः सन् महनीयगुणगरिष्ठः गृहस्थोपि कलोपासकानां सारस्वताचार्याणां शिरोरत्नं भूत्वा आनन्दव्रतिषु कौस्तुभगायक सार्वभौमः श्रीरामचन्द्रसन्निहितः असंख्याक हृदयाराध्यो देवो आन्ध्रत्यागराजस्वामी। कवेः, वेदान्तिनः गायकभक्ततात्त्विकाचार्यस्य त्यागराजस्य जीवितोदत्तप्रधानांशान् परिशीलयामः त्यागराजः क्री.श. १७५९ संवत्सरे सञ्जातः १८४७ पराभवसंवत्सरे पुष्यबहुल पञ्चमीतिथौ बुधवासरे वैकुण्ठं परमपदं प्राप्तः।

पण्डितवंशोत्पन्नस्य अस्य मातापितरौ शान्तम्मा, रामब्रह्माणौ। पितामहः गिरिराजकविः। मुरिकिनाटि शाखाब्राह्मणः काकर्लगृहनामकः भरद्वाजगोत्रीकः। तञ्जावूरु द्वितीयषाजी नामक महाराष्ट्रराजपालनकाले अस्य, पितामहः गिरिराजकविः राजानुग्रहं सम्पाद्य तिरुवक्करुग्रामे निवसतिस्म अयं संस्कृतान्ध्र पण्डितः। अस्य पूर्वीकाः नायकराजपालकानां काले तञ्जावूरुराष्ट्रे स्थिरनिवासं चक्रुः। अयं सदाचारसम्पन्नः। गिरिराजस्य पञ्चपुत्राः। पञ्चामस्तु रामब्रह्मा। संस्कृतान्ध्रप्रवीणः भक्तः वेदान्त कीर्तनारचनाप्रतिभाशाली। अस्य पुत्रद्वयमासीत्। ज्येष्टपुत्रः ज्यपेशः तिरुवक्कूरुस्वाम्याराधकः रामब्रह्मेति आहूयमानः आसीत्। द्वितीयपुत्रः एव त्यागराजः। पुत्रविद्याभ्यासार्थं कावेरीतीरस्थ तिरुवय्यूरुग्रामं रामब्रह्मा जगाम। तत्र संस्कृते पाठशालाप्यासीत्। त्यागराजः तत्र पञ्चसंवर्धनीपञ्चनदेश्वरं प्रति बहुधा संस्कृतान्ध्रभाषाप्रवीणः सन् कीर्तनाः रचयित्वा शिलाद्रावकवत् गायति स्म। मातृपितृभक्तः श्रीरामभक्तश्चासीत्।मातृपितृमरणानन्तरं भक्तिभरितः श्रीरामसङ्कीर्तनान्येव आलपति स्म। अस्य भक्ति गानविद्यकौशलात् बहवः जिज्ञासवः आकृष्टाः शिष्याः सञ्जाताः। त्यागराजः मोक्षमार्गदर्शकमन्विषनकाञ्चीपुरे कस्यचिन्महात्मनः सकाशात् तारकमन्त्रोपदेशमवाप।



षण्णवतिकोटिपर्यायं तारकं पुनश्चरणमकार्षीत्। निरन्तर रामसंस्मरणरामसङ्कीर्तनात् श्रीरामचन्द्रः प्रत्यक्षी बभूव। पश्चात् नारायण नाम सङ्कीर्तनमालपन् नारदः प्रत्यक्षीभूय स्वरार्णव सङ्गीतग्रन्थं उक्त्व अनुरागेण दत्वा गानमहत्त्वं लोकाय प्रचारयेति अदृश्यङ्गतः।

अग्रसोदरस्य ईर्ष्यया बाधितः स्वार्जितां दायभागसम्पदपि तस्यैव दत्वा सीतारामलक्ष्मणाः एव स्वसम्पदिति मेने। त्यागराजसोदरपुत्रः ज्यपेशः सोदराचार्याज्ञया सीतारामलक्ष्मणा विग्रहान् रात्रौ कावेरीनद्यां पातयामास। नदीपतितविग्रहान्वेषणे विफले त्यागराजे, भगवान् श्रीरामचन्द्रः स्वप्ने साक्षात्कृत्य विग्रहपतितनिर्दिष्टस्थलं सूचयामास। त्यागराजः तत्रैव विग्रहान् प्राप्य, स्वशिरसि निक्षिप्य तन्मयतया नृत्यञ्चकारतद्दृश्यं राम भक्ताः संवीक्ष्य आश्चर्यचकिताः आसन्।

तञ्जावूरुराजा शरभोजी त्यागराजग्रन्धकृतिं स्वाङ्कितं कर्तुमयाचत। अनङ्गीकृते त्यागराजे बध्वा कारागारे पीडयामस झटित्येव राजा दुस्सह शूलबाधितः त्यागराजमहत्त्वं ज्ञात्वा पश्चात्तत्पः तं बाधाविमोचनाय शरणङ्गतः। परिशुद्धात्मा त्यागराजः रामं सप्राथ्य तं बाधाविमुक्तश्चकार। तिरुवान्कूरु राजा त्यागराज महत्वं ज्ञात्वा स्वसन्मुखमानेतुं स्वास्थानगायकं वडिवेलुं प्रेषयामास। राजा महत्सम्पत् दास्यतीतिवडिवेलुना प्रेरितोऽपि नाहं राजसन्मानसंपत्कांक्षीति राजसकाशं नागमिष्यामीति वडिवेलुमनुनयप्रीतिवचनैःतिरश्चकार।

त्यागराजः स्वमन्दिरे एव राममन्दिरं निर्ममे। रामसङ्कीर्तनं कुर्वन् नगरे सञ्चरन्नासीत्। भक्ताः स्त्रीपुरुषाः पुष्पार्चन हारतिं वीथीषु ददतिस्म। त्यागराजः केवलं भिक्षाटनतण्डुलेन स्वकुटुम्बं शिष्यबृन्दञ्च पोषयति स्म। त्यागराजः रामभक्तोऽपि सर्वदेवता स्तोत्रैः समस्तमतानि समदृष्ट्या सम्भावयतिस्म सर्वमत दृष्टिः एकलक्ष्यमेवेति भिन्नमार्गाणामुद्देशः एक एवेति प्रबोधयामास। निष्कामभक्तिः मोक्षदायिनीति त्यागराजस्य प्रबोधः। रामकथासुधारसपानं बहुभङ्गीभिः प्रोवाच। त्यागराज गीतकृतयश्च निर्मलनीत्याध्यात्मिकभरिताः मधुरातिमधुराः श्रोत्रानन्ददायिन्यः भवन्ति। तीर्थयात्राप्रियः त्यागराजः कञ्चीमधुरनागपूर श्रीरङ्गादितीर्थ दर्शनं कुर्वन् कामाक्षीमीना क्षीश्रीरङ्गवरदराजस्वाम्यादिदेवतासेवया गेयपरम्पराभिः तास्ताः देवताः तुष्टाः। श्री वेङ्कटेश्वरस्वामिकीर्तनया तिरुमलं गत्वा पुरोहितैः महाद्वारवस्त्राछादनेन भगवद्दर्शनावरोधेसति ‘‘तेरतीयगरादा तिरुपति वेङ्कटरमण’’ इति आध्यात्मिका वेशगानञ्चकार। झटित्येव द्वारे दर्शनावरोध वस्त्रम् स्वयं दूरं बभूव। तदृष्ट्वा पुरोहिताः आश्चर्यचिकिताः आसन्।

तीर्थभ्रमणसमये मुदलियारुप्रभृतिभिः दैवगुरुसेवार्थं धने दत्ते अटव्यां चोरैः शिबिकायां दृष्टः अज्ञाततया शिष्यस्वीकृतधनं चोरनायकायैव ददौ। सः चोरनायकः त्यागराजमुद्दिश्य भवदुपरि प्रसारितशिलाखण्डाः (प्रस्तार) मघ्येव पतिताः इति भक्तसमीपे सुन्दरपुरुषद्वय दर्शनेन आन्तरङ्गिकापूर्वानुभूतिं प्रात्पोऽस्मीति मदपराधं क्षमस्वेति प्रार्थयामासा। त्यागराजः तव श्रीरामलक्ष्मणदर्शनं प्रात्पम् धन्यस्त्वमिति पवित्रवर्तनेन जीवेति हितमुपदिदेश। एवं बहुसंख्याकभक्तशिष्यानां मार्गदर्शको भूत्वा सिद्धहस्तः सङ्गीतनाटकान्यपि व्यरचीत्। १२ शताब्दे जयदेव गीतगोविद संस्कृतगीतकाव्य त्यागराज रचना सदृशमेव। १८ शताब्दे सङ्गीतात्मककवितायां अग्रगण्योऽयं प्रह्लाद भक्तविजये नौकाचरित नाटकद्वये भक्ति, श्रृङ्गारमधुर भावान् व्यक्तीचकार। तमिललान्ध्रदेशप्रसिद्धोऽयं महत्तरभव्य - भावमाधुर्य पूरितहृदयः राजसम्पदं परित्यज्य आत्मगौरवेण स्वीयंस्वातव्येण सूर्यचन्द्राविव प्रकाशमानः अन्ते अमरलोकमुक्तिकान्ताकण्ठं परिजग्राह। आन्ध्रजनयित्र्याः स्वमधुरकृतिभिः अमन्दानन्दं, प्रदाय महामहिमापेतोयम् आन्ध्रभक्तजनावलिः अस्मै नमस्सुमाञ्जिलं सर्वदा समर्पयति।

**त्यागराजराधनोत्सवाः -**

त्यागराज वैकुण्ठप्राप्त्यनन्तरं वर्षे वर्षे शिष्याः तद्गृहे स्वगृहे आराधनां कुर्वन्ति स्म। १९०७ वर्षादारभ्य तिल्लस्थानं नरसिंह भगवताः, वञ्जुभागवताः, वयोलित् गोविन्द स्वामिपिल्लै इत्यादयः महता संरम्भेण आराधनमहोत्सव प्रारम्भं चक्रुः बेङ्गलूरुनागरन्ताम्बा स्वार्जितं सर्वं धनं व्ययीकृत्य १९२५ वर्षे त्यागराज समाध्युपरि आलयं निर्ममे। तत्र १९४० वर्षात् त्यागराजाराधना महोत्सवः वर्षे वर्षे निर्वाह्यते। उत्सवेषु सहस्राधिकभक्ताः भागं गृहित्वा त्यागराजं पूजयन्ति। त्यागराजस्य देहत्यागमसमये दिव्य तेजः बहिरागत्य सङ्गीत साम्राज्यं अद्यापि पालयति। कर्णाटके आन्ध्रराष्ट्रे च वर्षे वर्षे त्यागराजोत्सवाः महता वैभवेन प्रचलन्ति। तिरुपति पट्टणे चेन्नैपट्टणे च त्यागराजमण्टपनाम्ना विशालप्रदेशे महामन्दिराणि निर्मितानि। तत्र सङ्गीतकार्यक्रमाश्च प्रचलन्ति।

**‘‘नादघेनोः नवनीतदाता त्यागराजः’’**

# विधिरनुल्लङ्घनीयः

- मूलम् आनन्द रामायणम्

कोसलदेश पालकस्य कौसल्या इति दुहिता आसीत्। तां परिणेतुं अयोध्याधिपतिः दशरथः अङ्गीचकार। विवाहकार्याणिसन्नद्धानि। लङ्काधिपतिः रावणः त्रिमूर्तिद्वारा वा अन्य देवताद्वारा वा मरणं नास्तीति वरगर्वितः स्ववंशमूलपुरुषं ब्रह्माणं लङ्कामाहूय मम कस्मान्मरणमस्तीति पप्रच्छ। तदा ब्रह्मा कौसल्या दशरथयोः जायमान पुत्रद्वारा रामात् तव मरणं स्यादिति साक्षच्छ्रीमन्नारायण एव रामनाम्ना अवतरिष्यतीति तव जननकाले एव विधिलिखितमिदमिति प्रोक्त्वा सत्यलोकञ्जगाम। ततः रावणः विधिलिखितोल्लङ्घनाय आलोच्य कौसल्यादशरथयोः विवाहप्रतिबन्धकः कर्तव्यः इति पुष्पकविमाने अयोध्यां जगाम। तदा सरयूनद्यां दशरथः नौकायां जलविहारं करोति स्म। रावणः दशरथेण युद्धसन्नद्धः नौकां पादाहतेन छिन्नां कृत्वा नौकास्थान् सर्वान् जलमग्नान् कृत्वा सर्वे मृताः इति मत्वा ततः कोसलराज्यं जगाम। तत्र कोसलाधिपतिं युद्धे पराजित्य तद्दुहितरं कौसल्यां बलात् नीत्वा आकाशयाने पुष्पक विमानद्वारा लङ्कां प्रति गच्छन् महावीरस्य मम अबलास्त्रीहत्यानिन्दा जनेषुमाभूदिति सञ्चिन्त्य मार्गे एकत्र महाजल दीवौ अवतीर्य एकं राक्षसं तिमिङ्गलरूपे परिणमय्य कौसल्यां एकस्यां पेटिकायां बद्ध्वा तेन तिमिङ्गलेन ''इमां पेटिकां रक्षन्निरीक्षस्व मयापृष्टो यदा कदापि पेटिकां मह्यं समर्पय इत्यादिश्य लङ्कां जगाम।

सरयूनद्यां रावणेन छिन्नायां नौकायां दैववशात् सुमन्तदशरथौ जलादुपरितलमागत्य छिन्ननौकादारु साहाय्यात् सरयूप्रवाहात् गङ्गानदीप्रवाहे प्रविशतुः। गङ्गानदी तौ समुद्रप्रवाहमानयामास। समुद्रतरङ्गाः तौ रावणबद्ध कौसल्यापेटिका समीपं प्रापयामासतुः ततः किञ्चित्समयपूर्वमेव तिमिङ्गल रूपस्थेन राक्षसेन अन्यत् तिमिङ्गलं युद्धं कृत्वा पलायितश्चकार। तदा राक्षस तिमिङ्गलं कौसल्यास्थितपेटिकां जलद्वीपावेव पलायनसमये तत्याज। तिमिङ्गलोभययुद्धसमये तज्जलाशयद्वीपं प्राप्तौ दशरथसुमन्तौ निर्जलप्रदेशे स्थितांपेटिकामुद्घाट्य कौसल्यां दृष्ट्वा संतुष्टः परस्परकुशलप्रश्नान् चक्रुः। ततः गान्धर्वविवाह पद्धत्या कौसल्या दशरथौ दम्पती बभूवतुः। पश्चात् रावणेन राक्षसदत्त पेटिकायामेव त्रयः प्रविविशुः। राक्षसतिमिङ्गलं पुनर्युद्धे आत्मानं पराजितं कृतं तिमिङ्गलं जित्वा पेटिकासकाशमागत्य तत्पेटिकां पूर्वमिव संगीर्य उदरे निवेश्य सञ्चरति स्म।

ततः रावणः पुनः ब्रह्माणमाहूय अहं दशरथं सरयूनद्यां हतवान् कौसल्यामदृश्यप्रदेशे बन्धे निक्षिप्तोऽस्मि। कथं कौसल्या दशरथयोः विवाहः भविष्यति ततः तयोः पुत्रः रामः कथं जनिष्यति। कथं श्रीमन्नारायणः रामो भूत्वा मां हनिष्यति। अहं विधिलिखितमुल्लङ्घितोस्मीति परिहासवचनैरवोचत्। ततः ब्रह्मा अचश्चलभक्तया दैवसाहाय्यादेव विधिलिखितपरिणामस्य स्यदिति कोसल्या दशरथौ परिणीय सुखं वर्तेते इत्युवाच। रावणः झटिति आश्चर्यचकितः द्वीपे जलस्थ राक्षसतिमिङ्गलात् पेटिकां प्राप्य तत्पेटिकां ब्रह्मसमीपे उद्घाटयामास। ततः पेटिकायां कौसल्यादशरथ सुमन्तान् दृष्ट्वा कोपेन हन्तुमुद्युक्तः। ततः ब्रह्मा अद्य कौसल्यापेटिकायां त्रयः वर्तन्ते। विधिगमनंत्वं ज्ञातुमसमर्थः। हननप्रयत्नाद्विरम्य अयोध्यां दूतद्वारा एतान् प्रेषय। अद्यैव तव मरणं किमर्थमाह्वयसि इति हितमुवाच। रावणः तदा भयाकुलः भविष्यत्परिणामं अवरोद्धुमहं अशक्तः इति दूतद्वारा कोसल्यादश रथसुमन्तान् अयोध्यां प्रेषयित्वा तात्कालप्रमादात् रक्षितोस्मीति लङ्कां गत्वा मनश्शान्तिमवाप। अतः यस्य कस्यापि विधिरनुल्लङ्घनीयः इति ब्रह्मवचनं सर्वधा सत्यमेव।



# तिरुमलतिरुपतिदेवस्थानानि
# तिरुपति

## जनवरि - २०२५

| भानुवासरः | इन्दुवासरः | भौमवासरः | सौम्यवासरः | बृहस्पतिवासरः | भृगुवासरः | मन्दवासरः |
|---|---|---|---|---|---|---|
| | | | 1 | 2 | 3 | 4 |
| 5 | 6 | 7 | 8 | 9 | 10 | 11 |
| 12 | 13 | 14 | 15 | 16 | 17 | 18 |
| 19 | 20 | 21 | 22 | 23 | 24 | 25 |
| 26 | 27 | 28 | 29 | 30 | 31 | |



श्रीदेवीभूदेवीसमेत श्रीमलयप्पस्वामिनः, तिरुमल।

## फिब्रवरि - २०२५

| भानुवासरः | इन्दुवासरः | भौमवासरः | सौम्यवासरः | बृहस्पतिवासरः | भृगुवासरः | मन्दवासरः |
|---|---|---|---|---|---|---|
| | | | | | | 1 |
| 2 | 3 | 4 | 5 | 6 | 7 | 8 |
| 9 | 10 | 11 | 12 | 13 | 14 | 15 |
| 16 | 17 | 18 | 19 | 20 | 21 | 22 |
| 23 | 24 | 25 | 26 | 27 | 28 | |

## मार्च् - २०२५

| भानुवासरः | इन्दुवासरः | भौमवासरः | सौम्यवासरः | बृहस्पतिवासरः | भृगुवासरः | मन्दवासरः |
|---|---|---|---|---|---|---|
| 30 | 31 | | | | | 1 |
| 2 | 3 | 4 | 5 | 6 | 7 | 8 |
| 9 | 10 | 11 | 12 | 13 | 14 | 15 |
| 16 | 17 | 18 | 19 | 20 | 21 | 22 |
| 23 | 24 | 25 | 26 | 27 | 28 | 29 |

### जनवरि - २०२५

१. आङ्गलसंवत्सरारम्भः
०६-१२. आण्डाल् नीराट्टोत्सवः
०८-१२ तिरुपति श्रीकपिलेश्वरस्वामिनः प्लवोत्सवः
१० वैकुण्टैकादशी
११ श्रीस्वामिपुष्करिणीतीर्थमुक्कोटि
१३. भोगि
१४. मकरसङ्क्रान्तिः
१५. कनुम, श्रीगोदादेवीपरिणयोत्सवः
२६. गणतन्त्रदिनोत्सवः
२९ तः फिब्रवरि ०६ पर्यन्तम् देवुनिकडपा श्रीलक्ष्मीवेङ्कटेश्वरस्वामिनः ब्रह्मोत्सवः

### फिब्रवरि - २०२५

०३. वसन्तपञ्चमी
०४. रथसप्तमी
०६-१२. तिरुपति गोविन्दराजस्वामिनः प्लवोत्सवाः
०८. भीष्मैकादशी
११. श्रीरामकृष्णतीर्थमुक्कोटि
१८-२६. श्रीनिवासमङ्गापुरम् श्रीकल्याणवेङ्कटेश्वरस्वामिनः ब्रह्मोत्सवः
१९-२८. पर्यन्तम् तिरुपति कपिलेश्वरस्वामिनः ब्रह्मोत्सवः
२६. महाशिवरात्रिः

### मार्च् - २०२५

०६-१४ पर्यन्तम् - तरिगोण्ड श्रीलक्ष्मीनरसिंहस्वामिनः ब्रह्मोत्सवः
९-१३. तिरुमलक्षेत्रे प्लवोत्सवः
१४. कुमारधारातीर्थमुक्कोटि, श्री लक्ष्मीजयन्ति
२६. अन्नमाचार्य वर्धन्ति
२४-२८ नागुलापुरम्, श्रीवेदनारायणस्वामिनः प्लवोत्सवः तथा सूर्य पूजा
२७ तः एप्रेल ०४ पर्यन्तम् तिरुपतिस्थ, श्रीकोदण्डरामस्वामिनः ब्रह्मोत्सवः
३०. 'श्रीविश्वावसु' नाम तेलुगु नूतन वर्ष उगादि
३१. मत्स्य जयन्ति

# तिरुमलतिरुपतिदेवस्थानानि
# तिरुपति



श्रीदेवीभूदेवीसमेत श्रीगोविन्दराजस्वामिनः, तिरुपति।

## एप्रेल् - २०२५

| भानुवासरः | इन्दुवासरः | भौमवासरः | सौम्यवासरः | बृहस्पतिवासरः | भृगुवासरः | मन्दवासरः |
|---|---|---|---|---|---|---|
| | | 1 | 2 | 3 | 4 | 5 |
| 6 | 7 | 8 | 9 | 10 | 11 | 12 |
| 13 | 14 | 15 | 16 | 17 | 18 | 19 |
| 20 | 21 | 22 | 23 | 24 | 25 | 26 |
| 27 | 28 | 29 | 30 | | | |

## मे - २०२५

| भानुवासरः | इन्दुवासरः | भौमवासरः | सौम्यवासरः | बृहस्पतिवासरः | भृगुवासरः | मन्दवासरः |
|---|---|---|---|---|---|---|
| | | | | 1 | 2 | 3 |
| 4 | 5 | 6 | 7 | 8 | 9 | 10 |
| 11 | 12 | 13 | 14 | 15 | 16 | 17 |
| 18 | 19 | 20 | 21 | 22 | 23 | 24 |
| 25 | 26 | 27 | 28 | 29 | 30 | 31 |

## जून् - २०२५

| भानुवासरः | इन्दुवासरः | भौमवासरः | सौम्यवासरः | बृहस्पतिवासरः | भृगुवासरः | मन्दवासरः |
|---|---|---|---|---|---|---|
| 1 | 2 | 3 | 4 | 5 | 6 | 7 |
| 8 | 9 | 10 | 11 | 12 | 13 | 14 |
| 15 | 16 | 17 | 18 | 19 | 20 | 21 |
| 22 | 23 | 24 | 25 | 26 | 27 | 28 |
| 29 | 30 | | | | | |

### एप्रेल् - २०२५

०३-११. वायलपाडु, श्रीपट्टाभिरामस्वामिनः ब्रह्मोत्सवः
०६-१४. ओण्टिमिट्ट
श्री कोदण्डरामस्वामिनः ब्रह्मोत्सवः
०६. श्रीरामनवमी
१०-१२. तिरुमल, श्रीस्वामिनः वसन्तोत्सवः,
तिरुपतिस्थ श्रीकोदण्डरामस्वामिनः प्लवोत्सवः
१२ तुम्बुरुतीर्थमुक्कोटि
१३-२१ नागुलापुरम्,
श्रीवेदनारायणस्वामिनः ब्रह्मोत्सवः
१४. तमिळनूतनसंवत्सरारम्भः
३०. श्रीपरशुरामजयन्ति, अक्षयतृतीया,

### मे - २०२५

०२. श्रीरामानुज जयन्ति, श्रीशङ्करजयन्ति
०६-०८. तिरुमल श्रीपद्मावतीश्रीनिवासपरिणयमहोत्सवः
०९-१२. तिरुचानूरु श्रीपद्मावतीदेव्याः वसन्तोत्सवः
११. श्रीनरसिंहजयन्ति, तरिगोण्ड वेङ्कमाम्बाजयन्ति
११-१९ हृषीकेश्/नारायणवनम्, अप्पलायगुण्ट
श्रीप्रसन्नवेङ्कटेश्वरस्वामिनः ब्रह्मोत्सवः
१२. श्रीकूर्मजयन्ति, श्रीअन्नमाचार्यजयन्ति
१३. तिरुपति गङ्गजातर
१५ सरस्वती नद्याः पुष्कर प्रारम्भः
१९-२७. कार्वेटिनगरम् श्रीवेणुगोपालस्वामिनः ब्रह्मोत्सवः
२२. श्रीहनुमज्जयन्ति

### जून् - २०२५

०२-१० तिरुपति श्रीगोविन्दराजस्वामिनः
ब्रह्मोत्सवः
०६-१०. तिरुचानूरु श्रीपद्मावतीदेव्याः प्लवोत्सवः
०७-१५. अप्पलायगुण्ट, श्रीप्रसन्नवेङ्कटेश्वरस्वामिनः
ब्रह्मोत्सवः
०९-११. तिरुमल श्रीस्वामिनः ज्येष्ठाभिषेकः
१७-१९. तिरुचानूरु श्रीसुन्दरराजस्वामिनः
अवतारोत्सवः
३०तः जूलै ०२ पर्यन्तम् श्रीनिवासमङ्गापुरम्
श्री कल्याणवेङ्कटेश्वरस्वामिनः साक्षात्कारवैभवम्

# तिरुमलतिरुपतिदेवस्थानानि
## तिरुपति



श्रीदेवीभूदेवीसमेत श्रीकल्याणवेङ्कटेश्वरस्वामिनः, श्रीनिववासमङ्गापुरम्।

### जूलै - २०२५

| भानुवासरः | इन्दुवासरः | भौमवासरः | सौम्यवासरः | वृहस्पतिवासरः | भृगुवासरः | मन्दवासरः |
|---|---|---|---|---|---|---|
| | | 1 | 2 | 3 | 4 | 5 |
| 6 | 7 | 8 | 9 | 10 | 11 | 12 |
| 13 | 14 | 15 | 16 | 17 | 18 | 19 |
| 20 | 21 | 22 | 23 | 24 | 25 | 26 |
| 27 | 28 | 29 | 30 | 31 | | |

### आगस्ट् - २०२५

| भानुवासरः | इन्दुवासरः | भौमवासरः | सौम्यवासरः | वृहस्पतिवासरः | भृगुवासरः | मन्दवासरः |
|---|---|---|---|---|---|---|
| 31 | | | | | 1 | 2 |
| 3 | 4 | 5 | 6 | 7 | 8 | 9 |
| 10 | 11 | 12 | 13 | 14 | 15 | 16 |
| 17 | 18 | 19 | 20 | 21 | 22 | 23 |
| 24 | 25 | 26 | 27 | 28 | 29 | 30 |

### सेप्टेम्बर् - २०२५

| भानुवासरः | इन्दुवासरः | भौमवासरः | सौम्यवासरः | वृहस्पतिवासरः | भृगुवासरः | मन्दवासरः |
|---|---|---|---|---|---|---|
| | 1 | 2 | 3 | 4 | 5 | 6 |
| 7 | 8 | 9 | 10 | 11 | 12 | 13 |
| 14 | 15 | 16 | 17 | 18 | 19 | 20 |
| 21 | 22 | 23 | 24 | 25 | 26 | 27 |
| 28 | 29 | 30 | | | | |

### जूलै - २०२५

०६. प्रथम एकादशी , चातुर्मास्य व्रत प्रारम्भः
०६-०८. तिरुपतिस्थ श्रीगोविन्दराजस्वामिनः ज्येष्ठाभिषेकः
०६-०९. तिरुपति, श्री कपिलेश्वरस्वामिनः पवित्रोत्सवः
१०. गुरुपूर्णिमा, व्यासजयन्ति
१६. तिरुमलक्षेत्रे स्वामिनः अणिवर आस्थानम्
१९-२२. तिरुपति श्रीकोदन्डरामस्वामिनः पवित्रोत्सवः
२८. नागचतुर्थी
२९. गरुडपञ्चमी

### आगस्ट् - २०२५

०२. मातृश्री तरिगोण्ड वेङ्गमाम्बावर्धन्तिः
०४-०७. तिरुमल श्रीस्वामिनः पवित्रोत्सवः
०८. वरलक्ष्मीव्रतम्
०९. श्रीहयग्रीवजयन्ति,
श्रीविखनसमहर्षिजयन्ति
१०. गायित्रीजपः
१५. स्वातन्त्र्यदिवसः
१६. श्रीकृष्णजन्माष्टमी, गोकुलाष्टमी
२५. श्रीबलरामजयन्ति, श्रीवराहजयन्ति
२७. विनायकचतुर्थी
२८. ऋषिपञ्चमी

### सेप्टेम्बर् - २०२५

०४ वामन जयन्ति
०४-०७. तिरूचानूरु, श्रीपद्मावतीमातुः पवित्रोत्सवः
०६. अनन्तपद्मनाभव्रतम्
०८. महालयपक्ष प्रारम्भः
२२. देवीनवरात्रोत्सवः प्रारम्भः
२४ तः अक्टोबर् ०२ तिरुमल श्रीवेङ्कटेश्वरस्वामिनः
ब्रह्मोत्सवः
२४ तः अक्टोबर् ०२ तिरुचानूरु श्रीपद्मावतीदेव्याः
नवरात्र्युत्सवः
२८. तिरुमल श्रीस्वामिनः गरुडसेवा
२९. सरस्वतीपूजा
३०. दुर्गाष्टमी

# तिरुमलतिरुपतिदेवस्थानानि
## तिरुपति



श्रीदेवीभूदेवीसमेत श्रीप्रसन्नवेङ्कटेश्वरस्वामिनः, अप्पलायगुण्टा।

### अक्टोबर् - २०२५

| भानुवासरः | इन्दुवासरः | भौमवासरः | सौम्यवासरः | बृहस्पतिवासरः | भृगुवासरः | मन्दवासरः |
|---|---|---|---|---|---|---|
| | | | 1 | 2 | 3 | 4 |
| 5 | 6 | 7 | 8 | 9 | 10 | 11 |
| 12 | 13 | 14 | 15 | 16 | 17 | 18 |
| 19 | 20 | 21 | 22 | 23 | 24 | 25 |
| 26 | 27 | 28 | 29 | 30 | 31 | |

### नवम्बर् - २०२५

| भानुवासरः | इन्दुवासरः | भौमवासरः | सौम्यवासरः | बृहस्पतिवासरः | भृगुवासरः | मन्दवासरः |
|---|---|---|---|---|---|---|
| 30 | | | | | | 1 |
| 2 | 3 | 4 | 5 | 6 | 7 | 8 |
| 9 | 10 | 11 | 12 | 13 | 14 | 15 |
| 16 | 17 | 18 | 19 | 20 | 21 | 22 |
| 23 | 24 | 25 | 26 | 27 | 28 | 29 |

### डिसेम्बर् - २०२५

| भानुवासरः | इन्दुवासरः | भौमवासरः | सौम्यवासरः | बृहस्पतिवासरः | भृगुवासरः | मन्दवासरः |
|---|---|---|---|---|---|---|
| | 1 | 2 | 3 | 4 | 5 | 6 |
| 7 | 8 | 9 | 10 | 11 | 12 | 13 |
| 14 | 15 | 16 | 17 | 18 | 19 | 20 |
| 21 | 22 | 23 | 24 | 25 | 26 | 27 |
| 28 | 29 | 30 | 31 | | | |

### अक्टोबर् - २०२५

०१. महानवमी
०२. विजयदशमी, गान्धीजयन्ति
१६-१९ श्रीनिवासमङ्गापुरम्, श्रीकल्याणवेङ्कटेश्वरस्वामिनः पवित्रोत्सवः
२०. नरकचतुर्दशी, दीपावली अमावास्या
२१. श्रीकेदारगौरीव्रतम्
२५. नागचतुर्थी
२९-३०. तिरुचानूरु श्रीपद्मावतीदेव्याः पुष्पयागः,

### नवम्बर् - २०२५

०२. कैशिकद्वादशी
१४. बालदिनोत्सवः
१७-२५ तिरुचानूरु श्रीपद्मावतीदेव्याः ब्रह्मोत्सवः
१७. धन्वन्तरि जयन्ति
२१. तिरुचानूरु श्रीपद्मावतीदेव्याः गजवाहनोत्सवः
२५. तिरुचानूरु श्रीपद्मावतीदेव्याः पञ्चमीतीर्थम्
२६. तिरुमलक्षेत्रे स्वामिनः पुष्पयागः, सुब्रह्मण्यषष्ठी

### डिसेम्बर् - २०२५

०१. गीताजयन्ति
०२. श्रीचक्रतीर्थमुक्कोटि
०३. तिरुपति श्रीकपिलेश्वरस्वामिनः कृत्तिकादीपोत्सवः, हनुमद्व्रतम्
०४. श्रीदत्तजयन्ति, श्रीकपिलतीर्थमुक्कोटि
१६. धनुर्मासारम्भः
१९. तिरुमल श्रीस्वामिनः अध्ययनोत्सवः प्रारम्भः
२९. तिरुपति श्रीकपिलेश्वरस्वामिनः प्लवोत्सवः प्रारम्भः
३०. वैकुण्ठैकादशी
३१. तिरुमल श्रीस्वामिपुष्करिणीतीर्थमुक्कोटि

# पुरन्दरदासाराधनमोहत्सवः



- डा एम्.ईश्वरम्मा
चरवाणी - ८१०६५७८२५०

वर्षे वर्षे कर्णाटके महाराष्ट्रे आन्ध्रतेलङ्गाणा तमिलनाडादि राष्ट्रेषु त्यागराजादीनां आराधनोत्सवाः जनवरि मासे प्रचलन्ति। तदनुसृत्य पुरन्दरदासाराधनोत्सवः अस्मिन् वर्षे जनवरिमासे २९ तिथौ प्रचलिष्यति।

पुरन्दरदासः आधुनिकसङ्गीतस्य आद्यः। जन्मना धनवानपि लोभी अपि पश्चात् परमभक्तः बभूव। अस्य मानसिकपरिवर्तन सम्बन्धिनी महती कथा वर्तते। अयं महाराष्ट्रे पूनासमीपे पुरन्दरगडूनामक कुग्रमे जनिं लेभे। अयं प्रान्तः तदा विजयनगरसाम्राज्ये आसीत्। तस्य जन्मनाम श्रीनिवास नायक्। तस्य पूर्वीकाः सम्पन्नाः वज्रव्यापारिणः आसन्। पुरन्दरदासः अपि वज्रवर्तके एव प्रविश्य महद्धनं सम्पादयामास। नवकोटिनारायणः इति बिरुदमपि प्राप। नित्यलोभबुद्ध्या सर्वदा धनचिन्तावानासीत्। तस्य पत्नी सरस्वतीभाई भगवद्भक्तिमती दयावती चप्यासीत् भर्तुः लोभगुणं ज्ञात्वापि नियमितुमसमर्थासीत्।

एवं गच्छति काले कश्चिदकिञ्चनः ब्राह्मणः पुत्रोपनयनार्थं धनार्थं श्रीनिवासनायकसमीपमागत्य अयाचत। पश्चादागच्छ पश्चादागच्छेति षण्मासपर्यन्तं वदन् ततः एकस्मिदिने उपयोग रहितं छिद्रं नाणें( ) ब्राह्मणाय दत्वा पुनर्नागन्तव्यमिति प्रेषयामास गच्छन् सः ब्राह्मणः सरस्वतीबाई, धार्मिक दयागुणं ज्ञात्वा भर्तुकृतं पैशुन्यं दयाराहित्यं तस्यै उवाच सा ब्राह्मणस्य साहाय्यार्थं भातृगृहादानीतं स्वनासमौक्तिकं ददौ। सः ब्राह्मणः तन्नासमौक्तिकं स्वीकृत्य कुसीदवर्तकस्य तस्यैव श्रीनिवासनायकस्य सकाशं गत्वा कुसीदपद्धत्या किञ्चिद्धनं दातुमयाचत। सः श्रीनिवासनायकः तन्नासिकमौक्तिकं स्वभर्याधीनं कथमस्य प्राप्तमिति भार्यां पप्रच्छ। सा मा शिक्षिष्यतीति भीत्या मरणसंसिद्धा विषपानाय विषपूरितं हस्तपात्रं कृत्वा, पातुं तत्पात्रं दन्तसमीपं नयन्ती तत्पात्रे नासमौक्तिकं दृष्ट्वा सानन्दं गृहस्थकृष्णविग्रहाय नमस्कृत्य भर्तुः तन्नासिकामौक्तिकं दर्शयामास। अयःपेटिकायां स्वगूहितमिदमेवेति भार्याद्वारा तस्य कृतमुपकारं ज्ञात्वा सर्वं दैवमायेति आत्मनः पैशुन्ये प्रवर्तने दयाराहित्ये पश्चात्तप्तः स्वभार्या भगवत्कृपापात्रा अभवदिति भगवत्स्वरूपं ब्राह्मणं क्लेशबाधितमकरवमिति मन्वानः स्वजितसर्वाः सम्पदं भगवन्नाम्ना दानधर्मकार्येभ्यः व्ययञ्चकार।

तस्मात् प्रभृति श्रीहरेः परमभक्तः सन् नवकोटिनारायणः नारायण भक्तः सन् नागवल्ली तुलसीमालां धरन् उदरपोषणार्थं भिक्षाजीवी बभूव। पुरन्दरदासो भूत्वा स्वकीर्तनाभिः प्रजाजिह्वाभिः कीत्यमानः भगवत्कृपया हरिदासानामादिगुरुरुस्सञ्जातः। प्रप्रथमकर्णाटकसङ्गीत विद्वान् वाग्गेयकारः अयं (१४७०-१५६४) कन्नडसंस्कृतकीर्तनानि ४७५०० विष्णुमूर्तेः अङ्कितं कृत्वा धन्यः बभूव। अस्य कीर्तनास्वद्य २२५ कीर्तनाः एव प्राचुर्ये, वर्तन्ते। १०० कीर्तनाः अङ्गलभाषायामपि मुद्रिताः। अस्य व्यासतीर्थ, कनकदासाः समकालिकाः। कर्णाटक सङ्गीत साधनाय अस्य अनेकास्वीयपद्धतयः सङ्गीतबोधनाय

अद्याप्युपयुज्यन्ते। कर्णाटक सङ्गीते प्रधाना रागमयमाळवगोळ पद्धतिरनेनैवाविष्कृतः। अन्याः बोधना पद्धतयः स्वरावळि - उभय स्वराः अलङ्काराः, लक्षणगीताः, प्रबन्ध युगभोगाः लङ्घनक्रमाः, गीताः, नूलादयः इत्यदिकृत्यंशाः। साधारणमानवैरपि गानयोग्य जानपदगीताः अध्ययनेनैव विरचिताः। पुरन्दरदासः वाग्गेयकारः, सङ्गीताध्ययनवेत्ता, कृतिकर्ता मृतिकर्ता शिशुलालनगीतारचयिता, सन्नयं कर्णाटक सङ्गीतपितामहः इति विरुदाङ्कितः प्रशस्यते पुरन्दरदासः।

त्यागराजः - प्रमुखवाग्गेयकारः त्यागराजः (१७६७-१८४७ मे जनवरि ६) पुरन्दरदासात् प्रेरितः इति प्रोक्तम्। त्यागराजः स्वप्रह्लादविजये पुरन्दरदासं ''दुरितव्रातमुलेल्लनु परिर्चेडि हरिगुणमुलबाडुचु नेप्पुडुनु परवशुड वेलयुपुरन्दरदासुनि महिमलनुदलचेद मदिलोन इति श्लाघयामास। द्वौ रामकृष्णयोरधिक भक्तिभावयुतावास्ताम्। अनयोः साधरणरचनाः अपि अन्तर्लीनतात्त्विकतालिकभावयुताः आसन्। उभावपि नरस्तुतिं राजाश्रयं राजसत्कारं न काङ्क्षितौ। पुरन्दरदासः समकालीनविजयनगरराजाश्रयं न प्राप्तः। ति.ति.देवस्थानमपि दाससाहित्यप्राजेकुद्वारा पुरन्दरदाससाहित्यं प्रचारयति। पुरन्दरदास विग्रहः तिरुपति अलिपिरौ तिरुमल-पादस्थाने स्थापितः। विशालभारतदेशे बहुविधाराधवोत्सवाः प्रचलन्ति - तेषु मुरुगन् सुब्रह्मण्याराधना (भद्रसू) उत्तरभारते रामकृष्णाराधना, वेङ्गलूप्रान्ते शाक्तेयाराधना, कर्णाटक विठलाराधना इत्यादयः सुप्रसिद्धाः। आन्ध्रराष्टे श्रीवेङ्कटेश्वरस्वामिनः आराधनायाः यथा अनन्तप्रचारः एवं विठल भक्तेः साहित्यस्य च प्रचारः दृश्यते। कर्णाटके सङ्कीर्तन साहित्यप्रचारः अत्यधिकः मध्वाचार्यस्य द्वैतमतत्वात् द्वैतमठाधिपतयः द्वैतसाहित्यं सङ्कीर्तनाभिः प्रचारं चक्रुः। कर्णाटक सङ्गीतसाहित्ये ४०० सङ्कीर्तनाचार्याः आसन्निति चारित्रकाधारात् ज्ञायते। विस्तृत सङ्कीर्तनसाहित्योद्धरणाय श्रीपादराय व्यासरायपुरन्दरदासादयः प्रमुखाः। एते विठले भक्तिं सामान्य-प्रजासु स्थिराश्चक्रुः। दाससाहित्यस्य पुरन्दरदास गुरोः व्यासरायस्य प्रामुख्यं तस्य रचनावैशिष्ट्यममूल्यम्। गुरुप्रभावः पुरन्दरदाससाहित्ये अनन्यः। समाजे कलुषिते तदुद्धरणाय भगवदवतारवत् कळियुगे, मठाधिपतयः सङ्कीर्तनाचार्याश्च मार्गदर्शकत्वमवलम्ब्य प्रजानां वेदोपनिषत्सारं धार्मिकनैतिकप्रबोधं कालानुगुणं चक्रुः। निर्मलजीवितेन श्राव्यसङ्गीतेन एतेषां कीर्तनाः कन्नड भाषायां देवरनामगळुरूपेण सम्यक् प्रचारं प्रापुः। सङ्गीत कीर्तनाचार्याः देशाटने क्षेत्रसन्दर्शने तत्रत्स्थानदेवान् श्राव्यसङ्गीतेन प्रस्तोषिसुः। एतादृशेषु सङ्कीर्तनाचार्येषु अग्रगण्यः पुरन्दरदासः पर्यटने, अरुणगिरि अहोबिलं, उडिपि, श्रीरङ्गं कञ्चिकनकगिरिः काशी तिरुमल कुम्भकोणादि, प्रसिद्ध पुण्यक्षेत्राणि संदृश्य कीर्तनाभिः तत्रस्थदेवान् स्तुतवन्तः। अयं तिरुमल वेङ्कटेश्वरस्वामिनमधिकृत्य ५० सङ्कीर्तनाः अगायतेति ज्ञायते। पुरन्दरदासः वेङ्कटेश्वरस्वाम्युत्सवेष्वपि भागं गृहीतवन्तः। वेङ्कटेश्वरमधिकृत्य पुरन्दरदासकीर्तनासु ''वेङ्कटाचल निलयं वैकुण्ठपुरवासं तिरुपति वेङ्कटरमणनिनगे, यातके बारदुकरुण इत्यादयः जगत्प्रसिद्धाः।

असङ्कुचितः अयं शैववैष्णवभेदं कुलमतभेदं स्वकीर्तनासु प्रदर्शितवान्। इक्षुदण्डे वक्रेऽपि इक्षुरसे वक्रत्वं न स्यादिति, गोवर्ण बहुत्वेऽपि क्षीरमेकवर्णमेवेति समाजं बुवोध। भगवद्भक्त्या गृहस्थजीवितं श्रेयस्करमिति स्वकीर्तानाभिः प्रचारयामास। पुरन्दरदासः भक्त्याध्यात्मिकतामेकीकृत्य वेदोपविषत्सारं कीर्तनाभिः सामान्येभ्यः उपदिदेश। मठाधिपत्यामोदार्थं द्वैतमतकीर्तनाः ९०% मानसिकस्वभावप्रतिबिम्बकतया कीर्तयामास। 'कुरुडनायिता सन्तेगेबन्तु अन्धशुनकः पथण्यवीथीक्षातिर्पि' उत्सव गजो आगतः इति कीर्तनायां सत्यवन्तरगि दुकालवल्ल इति कीर्तनायां सत्यपालकानां जीवितं महाक्लेशकरमिति प्रकाशित वान्। एकां कथामनुसृत्य हम्पीविजयनगर वीथीषु भिक्षाटने भ्रमतः हरिदासस्य कथायां अज्ञातवेषे मौक्तिकानि प्रक्षिप्य दिने दिने, अन्ते तानि मौक्तिकानि तस्य तुलसीवने तुलसीवृक्षहाराणीव दृष्ट्वा दिग्भ्रान्तः तस्य सम्पत्सु निराशात्वं जज्ञे इति कथयन्ति।

मातृपितृसेवानन्तरं आतिथ्यं दास्यामीति आगतं अज्ञात्वा अतिथिरूपाय विष्णवे गृहप्राङ्गणे स्थातुं एकां इष्टिकां भक्तपुण्डरीकः ददाविति भगवान् तस्यामिष्टिकायां पुण्डरीकागमनपर्यन्तं निरीक्ष्य तस्य मातृपितृभक्तिं ज्ञातवानिति इष्टिकाशब्द एकः कालान्तरे विठल शब्द परिणामं प्राप्ता पुण्डरीकज्ञापकतया भक्तपुण्डरीकविठल क्षेत्रं बभूवेति कथा दृश्यते।

एवं भक्तशिखमणिः सङ्गीत साम्रज्य चक्रवर्ती पुरन्दरदासः स्वमधुरसङ्गीतकीर्तनाभिः सङ्गीतज्ञानां मनसा नित्यं संस्तूयामानः चिरञ्जीवीसन् समाराध्यते।

**भक्तिसङ्गीततोषित भगवद्दासाय पुरन्दरदासाय नमो नमः।**

# कूरत्ताळवार् वैभवम्

- डा.के.कोटेश्वरय्य
चरवाणी - ९९८५१२३२६२



कूरत्ताळान् वैभवाय तस्य निष्कलङ्कजीवितं शास्त्रोक्तरचनाजीवितं सूर्यचन्द्रकान्ति वैभवमिव प्रधान हेतुकं भवति।

दक्षिण भारत वैष्णवमतव्याप्रेः अत्यन्तमुपकृतः कूरताळवान् (महाशयाः) आचार्याः। तदाचार्यपरम्परा नाथमुनिना आरब्धेति विदुषां विश्वासः। ८२३-९१७ वर्षेभ्यः आरब्धायां आचार्यपरम्परायां कूरत्ताळवान् १००९ - ११२७ एकः। केषाञ्चित् स्वनामापेक्षया ग्रामबिरुद नामान्येव स्थिरत्वं प्राप्नुवन्ति। तादृशेषु आचार्येषु कुरुत्ताळवान् एकः। अस्य पूर्वनाम अनन्त इति। काञ्चीपुर समीपस्थ कूरनामक प्रान्तवासत्वात् कूरत्ताळवान् कूरत्ताळ्वान् इत्ययं प्रसिद्धिमवाप। ग्रामाधिपतित्वात् सम्पदि कुबेरः, बुद्धौ बृहस्पतिः, नित्यान्नदानपरः आसीत्। सूर्योदयात् प्रभृति रात्रौ द्विवादनपर्यतं अन्नदानसन्तर्पणं प्रचलतिस्म। अन्नदानानन्तरं गृहद्वाराणि पिधितान्यासन्। कदाचित् द्वारपिधान शब्दः मेघगर्जनवत् श्रूयमाणः श्रीरङ्गस्य रङ्गनायकीकर्णपर्यन्तमागतः।तदा सा अर्धरात्रौ कस्मादयं शब्दः आगतः इति पतिमपृच्छत्। करेशस्वामिगृहद्वारपिधान शब्दोऽयमिनि दिव्यदृष्ट्या अवोचत्। तदा सा कूरेशं द्रष्टुमाह्वयेत्यपृच्छत्। रङ्गनायकः पूर्णाय भक्ताय कूरेशमानेतुं आज्ञां ददौ। सः काञ्चीपुरं गत्वा रङ्गनाथाय व्यजिज्ञपत्। कूरेशः रङ्गनायिकाकाङ्क्षां ज्ञात्वा तत्सकाशंगन्तुमहं अर्हो वा अनर्होवेति विचिन्त्य आत्मनि, विद्याधनाभिजात्यमदाः वर्तन्ते इति तत्क्षणं गृहादिधनानि तृणवत् परित्यज्य भार्यया सह श्रीरङ्गं जगाम। अटवीभागे आवयोः प्राणभीति भवेद्वेति भार्यया पृष्टे सति मत्सकाशे किमपि नास्ति किल भीतिः किमर्थमिति उक्ते सति तदा सा आगमनसमये क्षीरपानार्थं स्वर्णपात्रमानीतमिति प्रोवाच। तदा सः स्वर्णपात्रं दूरमपससार। ततः निश्चिन्तया तौ काञ्चीं जग्मतुः।

कूरन् इति काञ्चीपुर समीपाग्रहारः। तत्र सर्वशास्त्रकोविदः अनन्तभट्टः आसीत्। तस्य कुमारः पूरेशः। तं पूरेशं महानुभावं श्रीरामांशः इति तदा भावयन्ति स्म। तमेव कूरनाथः इति कूरत्ताळवान् इत्यपि व्यवहरन्ति स्म। यतिराजरामानुज गुणगणैः हरिभक्तिपारम्यतया आकृष्टः कूरत्तळवान् तमाश्रितः। सर्वास्वप्यवस्थासु रामानुजाय दक्षिणवामभुजवत् रक्षकः बभूव। अतः रामानुजः मम कूरेशः यज्ञेपवीत वत् दण्डवत् सहायकः इति गोष्ठीपूर्णेन अवोचत्। कूरेशः पवित्ररूपः इति समन्वयमपि करोति स्म। रामानुजः गोष्ठीपूर्णाय तिरुमंत्रोपदेशं चकार। तेनैवोद्देशेन कूरेशः चरमश्लोकं उपदिशेति रामानुजमपृच्छत्। तदा यतिराजः रामानुजः वर्षपर्यन्तं गरुशुश्रूषां कृतवतामेव मन्त्रोपदेशः कर्तव्य इति इयं गुर्वाज्ञेति वर्षपर्यन्तं निरीक्षा कर्तव्येति प्रोवाच। तदा कूरेशः तावत्पर्यन्तं शरीरमस्थिरमिति निरीक्षां न करिष्यामीत्युक्ते शुष्कोपवासदीक्षया अन्ततो। गत्वा मासपर्यन्तमवश्यं निरीक्षा कर्तव्येति रामानुजसमाधानं श्रुत्वा मासपर्यन्तमुपवासदीक्षया निरीक्ष्य ततः गुर्वनुग्रहात् चरमश्लोकोपदेशमवाप। एवं कूरेशेन गुर्वनुग्रहदयापात्रः बभूव।

श्रीरामानुजः श्रीभाष्यं लिखितुं संसिद्धः कूरेसेन सह काश्मीरंगत्वा तत्र पण्डितान् वाग्वादे अजयत्। बोधायनवृत्तिदानाय पृष्टाः पण्डिताः निराकुर्वन्। विचारग्रस्ते रामानुजे काश्मीरनिवास वेळायां बोधायनवृत्तिं रात्रौ परिशील्य तत्र विषयान् सर्वानवगतोऽस्मि ग्रन्थे यत्र कुत्रापि पृष्टप्रश्नानां समाधास्यामीति कूरेशः रामानुजमुवाच। तदा रामानुजः आवयोः काश्मीरप्रयाणं सार्थकं बभूवेति संतुष्टः आसीत्। ततः कूरेशात् बोधायनवृत्तितिशेषान् विवेद। ततः श्रीरामानुजे श्रीभाष्यस्य वक्तरि सति, कूरेशः लेखको भूत्वा भाष्यनिर्माणे सम्यगुपचकार। रामानुजः तिरुमन्त्रोपदेशार्थं १८ अष्टादशवारं तिरुक्कोष्ट्यूरु जगाम। शिष्यश्रद्धापरीक्षां योग्यतां परीक्षितुं गुरुः तथा चकारेति पश्चदजानीत्। अन्ते श्वः पवित्रदण्डाभ्यां आगच्छेति पृष्टः रामानुजः तथैवेत्यङ्गीकृत्य कूरत्वाळवान् दाशरथिभ्यां सह गुरुसकाशं जगम। एक एव नागतः इति गुरुणा पृष्टः कुरत्ताळवार् स्वपवित्रमिति परिचयञ्चकारेति वदन्ति। रामानुजस्य श्रीभाष्यरचनार्थं काश्मीरवाससमये बोधायनवृत्तिकण्ठस्थीकरणं तद्वारा कूरेशुना भाष्यरचनायां लेखकत्वेनोपकारः अनन्यसाधारण विषयः।

कूरेशभार्यायाः आण्डाल्देव्याः एकः परशंभट्ट द्वितीयः श्रीरामपिल्ले इति पुत्रद्वयमासीत्। द्वयोरपि वेदव्यास भट्टः इति नामान्तरमासीत्। उभावपि पित्रा श्रीवैष्णवप्रमुखाचार्यौ सम्पन्नौ।

कुरत्ताळवान् बहुग्रन्थकर्ता। अस्य पञ्चस्तवी पण्डितलोके सुप्रसिद्धा अस्मिन् ग्रन्थे १. वैकुण्ठस्तवम् २. अतिमानुषस्तवं ३. सुन्दरबाहूस्तवम् ४. वरदराजस्तवम् ५. श्रीस्तवमिति पञ्च स्तोत्राणि सन्ति। वैष्णववाङ्मये अस्य ग्रन्थस्य अपारगौरवं वर्तते। अस्य गुरुभक्तया रचितं तेट्टलेशाखा विशिष्टाद्वैताय प्राणभूतः नालायिरदिव्य प्रबन्धे एकं श्लोकमुदाहरणतया पश्यन्तु-

**यो नित्यमच्युतपदाम्बुजयुग्मरुक्म**
**व्यामोहतः तदितराणि तृणायमेने।**
**अस्मद्गुरोर्भगवतोऽस्य दयैकसिन्धोः**
**रामानुजस्य चरणं शरणं प्रपद्ये।।**

दक्षिण भारते वैष्णवे कूरत्ताळवार् स्थानं सुस्थिरमासीत्। एतस्य रामानुजस्य सन्निहितशिष्यत्वमेव प्रधानकारणं भवति।

रामानुजस्य प्रत्याम्नायत्वेन चोलराजास्थानं गत्वा शिवात्परं नास्ति इति वाक्यस्य अधः हस्ताक्षरलेखनमनिच्छन् कूरुत्ताळवान् द्रोणमस्ति। ततः परं इति लिलेख। शिव, द्रोणं द्वे अपि परिमाणगणपात्रे। शिवं लघु, द्रोणंमहत् इत्यत्र विशेषभावः। क्रुद्धः राजा शिव भक्तः तस्य नेत्रापनयनाय भटानादिदेश। कूरुत्ताल्वान् विष्णुद्वेषिनं राजनं नाहं पश्येयमिति स्वनयने स्वयमेव नखैः, च्छेदयामासेति ऐतिह्यं वर्तते। एवं स्वशिक्षां कूरत्ताळवान् अनुभूतः इति तस्मिन्नपारवात्सल्यमासीदिति वदन्ति।

वैष्णवपरम्परायां प्रसिद्धाचार्यपुरुषत्वात् रामानुजतानु सरणत्वात् अस्य रचनासु विशिष्टाद्वैत सिद्धान्ताः एव सुस्पष्टं दृश्यन्ते।



श्रीवैष्णवे ईश्वर, जीव प्रकृत्यांशाः प्रधानाः। अस्मिन् सिद्धान्ते सृष्टिस्थितिसंहारादीनां नारायणः एव ईश्वरः। अयमंशः कूरत्ताळवान् वैकुण्ठस्तवे दृश्यते - पश्यन्तु : -

अस्तं .....................

मीशंदरिद्रमथ जङ्गमप्यलिङ्गम्।

विश्वं विचित्रमक्लिक्षणवीक्षणेन

विक्षोभयस्यनवधिर्बत शक्तिरैशी।।

एवं - जीवः आत्मा, च परमात्मनः दासभूतावेव इति लक्षणं वरदराज स्तवे - पश्यामः -

२. त्वद्दास्यमस्यहि मम स्वरसप्रसक्तम्

तच्चोरयन्नयमहं किल च स्थलं प्राक्।

त्वं मामकीन इति मामभिमन्यसे स्म

हस्तीश! संशमय नस्तमिमं विवादम्।।

एवं : - ज्ञानरहितं जडमचेतनं विकारपरिणाम गामिनी प्रकृतिरेव अयमंशः सुन्दरबाहुस्तवे व्यज्यते -

उदा ३. शशिधररिंखणाढ्यशिखमुच्छिखर- प्रकरं

तिमिरनिभप्रभूत तरुपाण्डमयं भ्रमदम्।

वनगिरिमावसन्तमुपयाभि हरिं शरणं

भिदुरितसप्तलोकसुविश्रृङ्खल शंखरवम्।।

कूरत्ताळवान् तेङ्गलै वैष्णव सम्प्रद्रायानुसारी अतः तद्रचनासु शरणागतिप्राधान्यं पश्यामः - अमानुष स्तवे उदा -

४. अद्यापि नास्त्युपरति स्त्रिविधापचारात्

पापः परे निपतितोऽस्मि तमस्य पारे।

एतादृशोहऽमगतिर्भवतो दयायाः

पात्रं त्वदीयचरणौ शरणं प्रपद्ये।।

कूरत्ताळवान् न केवलं भक्तः कविरपि। कवितासौन्दर्यश्लोकाः नवरसानुगुणवर्णनपराः बहवः तस्य रचनायां वर्तन्ते। उदा

५. नखक्रकचक्रप्रथिक्रथितदैत्यवक्षः स्थली

समुत्य रुधिरश्चटाच्छुरित बिम्बितं स्वं वपुः।

विलोक्य रुषितः पुनः प्रतिमृगेन्द्रशङ्कावाशात्

य एव नखरेसरी न इह दृश्यते सुन्दरः।।

सामान्य स्त्रियः इव काव्यस्यापि शब्दालङ्काराः काव्यगौरवं पोषयन्ति। कूरत्ताळवान् २४ विधालङ्कारान् समन्वय पूर्वकं प्रयुक्तवानिति डा.राजगोपालन् सिद्धान्तग्रन्थपरिशीलनद्वारा सम्यक् व्यज्यन्ते। क्रूरुत्ताळवान् रचनासु वेदोपनिषत्सारांशाः कवितात्मकतया निर्दिष्टाः। वैष्णवैः प्रधानतया भाव्यमान लक्ष्मीपुरुषकारस्वभावः, आचार्यानुग्रहश्च पञ्चस्तव्यां सम्यक् सन्दृश्येते। कूरुत्ताळवान्महाशयस्य वैयक्तिक, कौटुम्बिक श्रीवैष्णवजीवितं, तद्रचनासु रामानुजानुचार्यसिद्धान्तानुगुणं त्रिवेणीसङ्गमः इव क्षीरनीरमिव सम्मिश्रितं सत्संशोभते।

## वैकुण्ठैकादशी



दैवमाहात्म्ययुत एकादशीषु वैकुण्ठ एकादशीमहोत्तमा भाति। सर्वेषु विष्णवालयेषु वैकुण्ठैकादश्युत्सवाः वैभवोपेततया निर्वाह्यन्ते। श्रीरङ्गेरङ्गनाथस्वाम्यालये एकादश्युत्सवः वर्णणातीतः। तिरुपति तिरुमलक्षेत्रेषु ति.ति.देवस्थानाधिकारिणः एकादश्यां वैकुण्ठद्वारदर्शनाय सर्वविधसौकर्याणि भक्तेभ्यः कल्पयन्ति। विष्णुना वैकुण्ठादागत्य भूमौ मुरासुर शत्रुसंहार कृतदिनत्वात् अस्य दिनस्य वैकुण्ठैकदाशी दिनमिति नाम आगतम्। अस्मिन् दिने उत्तरद्वार द्वारा श्रीमहाविष्णु दर्शनात् पुनर्जन्म नास्तीति शास्त्रवचनम् ।

एकादशीव्रतं नाम सर्वकामफलप्रदम्।

कर्तव्यं सर्वदा विप्रैर्विष्णुप्रीणन कारणम्।।

# संक्रान्ति सानन्दोत्सवाः

तेलुगु मूलम् - श्री के.वेङ्कटाप्पल्लाचार्युलु
चित्राणि - श्री के.वि.कोटिलिङ्गाचार्य
संस्कृतानुवादः - डा.सूर्यनारायणरेड्डि
चरवाणी - ८१०६५७८२५०

ग्रामः आनन्दकोलाहलाः, नूतनवधूवरैः शोभायमानग्रामीण प्राङ्गणानि। अविवाहितबालिकानां किलकिलारावाः मातामहीभिः आत्मीयभावेन सल्लापयन्त्यः दौहित्र्यः।



मातामहि! किमर्थं गृहप्राङ्गणे महत्यः रङ्गवल्ल्यः। तत्र गोमय बृहद्रूप पिन्डि पुञ्जानि दृश्यन्ते।

वत्से! ननु एते गोमयपिन्डकारीषाः। सर्व देवता निलय गोमय कारीषाः गोब्बेम्म देवताः इति व्यवहरन्ति।

तादृशबृहदाकार रङ्गवल्ल्यः किमर्थं रचिताः।

धनुर्मास प्ररम्भक्षणात् रङ्गवल्ल्यः गृहप्राङ्गणे निर्मीयन्ते। तदैव लक्ष्मीदेवी प्रतिगृहं आगच्छति।



वृषभाः वस्त्राच्छादिताः क्रीडन्ति किमेतत्?

वत्से ते पवित्र वृषभाः।

प्रातः गायन्तः बहवः जनाः आगताः। अद्य पवित्रवृषभाः आगताः।

तथैव वत्से! संक्रान्तिः दिनत्रयपर्वम्। बहुविधसस्यानि फलीभूतानि कृषीवलगृहं आगच्छन्ति।



कृषीवलाः सानन्दं एतेभ्यः धान्यानि वितरन्ति।

पवित्रवृषभ चालकाः हरिदासाः ढंकावादकाः जंगमदेवराः एते सर्वे संक्रान्ति दिने एव आगच्छन्ति।



भोगि पर्वदाहाः - बदरीफलानि - माङ्गल्यवतीनां आनन्दोत्सवाः।
मातमहि! किमर्थं अग्निदाहः प्रातःकाले कृतः ।
एते भोगिपर्वदाहाः वत्से! भोगिदाहाः भोगिपर्वदिने एव करणीयाः अस्मिन् दिने तैलमर्दनं शरीरे कृत्वा ततः स्नानं कृत्वा नूतनवस्त्राणि धर्तव्यानि।
अविवाहित स्त्रियः गोब्बेम्मनां परितः भ्रमन्त्यः गायन्त्यः नाट्यं कुर्वन्ति।
पश्चात् बदरी फलानि बालबालिकाशिरस्सु प्रकिरन्ति।
संक्रान्तिः
कनुमा
अस्मिन् दिने किं कुर्वन्ति?
गृहस्थाः नूतनवस्त्राणि धरन्ति। ब्राह्मणान् आहूय तेभ्यः कूष्माण्ड फलं वितरन्ति।पशुपर्वदिनम्
पितामहः धेनूः किमर्थं जलेन शुचीकरोति।
इदं दिनं पशुपर्वदिनम्। पशवः आराध्यन्ते, पूज्यन्ते।
सर्वे जनाः सुखिनो भवन्तु।

प्रदत्तं चित्रपटम् बिन्दुसाहाय्येन पूरयामः वा?



अस्य चित्रपटस्य रञ्जनं कुर्मः वा?

बा
ल
वि
नो
दि
नी





अ. वैकुण्ठैकादशी
आ. गोदापरिण्यम्
इ. संक्रान्ति,कनुम

उचित समाधान सङ्ख्या कोशे लिखन्तु।





मार्गं अण्विषन्तु



बालस्य पतङ्गं अधः पतितम्। केन मार्गेण गत्वा बालः पतङ्गं प्राप्स्यति।







चित्राणि क्रमसंख्यापद्धतौ निक्षिप्य कथां ज्ञात्वा नीतिं जानन्तु।

समाधानानि : - चित्र क्रम संख्या - १,२,५,३,४



Printed by Sri P. Ramaraju, M.A., and Published by Dr. K. Radha Ramana, M.A., M.Phil., Ph.D.,P.G.Dip.in Epigraphy, Dip. in Yoga ,on behalf of Tirumala Tirupati Devasthanams and Printed and Publised at Tirumala Tirupati Devasthanams Press, K.T. Road,Tirupati 517 507. Editor : Dr.V.G. Chokkalingam, M.A., Ph.D.



तिरुमलतिरुपतिदेवस्थानपरिपालनभवनसमावेशविशाल प्राङ्गणे नवम्बर्मासे 18.2024 तिथौ प्रवर्तितं आनन्दप्रदं कार्तिकमहादीपोत्सव वैभवम्। तत्र ति.ति.दे. कार्यनिर्वहणाधिकारिण: श्री जे.श्यामलारावु ऐ.ए.यस्., ति.ति.दे. संयुक्तकार्यनिर्वहणाधिकारिण: श्रीवीरब्रह्मं ऐ.ए.यस्., अन्ये प्रमुखा:, अधिकारिण:, विषेषभक्तजनाश्च भागं गृहीतवन्त:।



तिरुमलक्षेत्रे डिसेम्बर्मासे तृतीयतिथौ श्रीपतिदर्शनार्थं आगतभक्तजन क्यू पंक्तिमार्गं परिशील्य भक्तै: भाषमाना: ति.ति.दे. पालकमण्डल्यध्यक्षा: गौरवनीया: श्री बि.आरुनायुडु महोदया: अन्य: पालकमण्डलीसभ्य: गौरवनीय: श्री जि.भानुप्रकाशरेड्डि महोदयश्च।



2024 नवम्बर् 22 दिनाङ्के तिरुमलक्षेत्र यात्रिकवसति समुदाय: - 3 संख्यायां केन्द्रीयलाकर् कृते कल्पितसौकर्यनिर्देशितस्थानाय कृतप्रारम्भोत्सव: ति.ति.दे. कार्यनिर्वहणाधिकारिण: श्री जे.श्यामलारावु ऐ.ए.यस्., महोदया:। तत्र अनुबन्ध कार्यनिर्वहणाधिकारिण: श्री सि.हेच्. वेङ्कय्यचौदरि ऐ.ए.यस्., महोदयाश्च भागं गृहीतवन्त:।



2024 सेप्टम्बर् 29 तिथौ ति.ति.दे. परिपालनभवने प्रवर्तित प्रपञ्च बधिरदिनोत्सव:, प्रपञ्चसङ्केतभाषादिनोत्सवमनोहर कार्यक्रमश्च।



चतुषष्टि (64) अन्तर्जतीयदिव्याङ्गदिनोत्सव सन्दर्भे ति.ति.देवस्थानादिकारिभि: प्रवर्तित सभायां भाषमाना: वक्तार: अपि च समावेशाय उपस्थिता: उद्योगिनश्च।

SAPTHAGIRI (SANSKRIT) SPIRITUAL ILLUSTRATED MONTHLY PUBLISHED BY
TIRUMALA TIRUPATI DEVASTHANAMS PRINTING ON 25-12-2024 & posting at Tirupati
RMS Regd.with the Registrar of Newspapers for India under RNI No.21138/1970 Postal
Regd. No. TRP/154/2024-2026" LICENCED TO POST WITHOUT PREPAYMENT
No.PMGK/RNP/WPP-04(4)/2024-2026" Posting on 5th of every month.



ईशानां जगतोऽस्य वेङ्कटपते र्विष्णोः परां प्रेयसीं
तद्वक्षःस्थल नित्यवासरसिकां तत्क्षान्तिसंवर्धिनीं।
पद्मालङ्कृतपाणिपल्लवयुगां पद्मासनस्थांश्रियं
वात्सल्यादिगुणोज्ज्वलां भगवतीं वन्दे जगन्मातरम्॥